# संस्कृतवार्ताः

**दिनाङ्कः - 17.12.2024** **सायम् - 06:20**

## मुख्यवार्ताः

- प्रशासनेन एकं राष्ट्रम् एकं निर्वाचनम् इत्यनेन सम्बद्धं विधेयकद्वयम् अद्य लोकसभायां प्रस्तुतम्। विपक्षिदलैः विरोधः कृतः अपि च संविधानस्य संरचनागताधारे कठोरप्रहारः ख्यापितः।
- राज्यसभया अद्य भारतीयसंविधानस्य पञ्चसप्ततिवर्षाणां गौरवशालियात्रायाम् समायोजिता विशिष्टचर्चा अग्रे समारब्धा। केन्द्रीयमन्त्री जगत्प्रकाश-नड्डाः अवदत् यत् प्रशासनं संवैधानिकमूल्यानां रक्षणार्थं प्रतिबद्धम् वर्तते।
- प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य राजस्थानस्य जयपुरे आयोजिते कार्यक्रमे षट्चत्वारिंशत्-सहस्रकोटिरूप्यकाणां चतुर्विंशति-परियोजनानाम् उद्घाटनं, लोकार्पणं च विहितम्।
- भारतीयऋतुविज्ञानविभागेन पश्चिम-हिमालयीयक्षेत्रे, राजस्थान-पञ्जाब-हरियाणा-चेत्यादिषु राज्येषु च तीव्रशीततरङ्गस्थितेः पूर्वानुमानं कृतम् अस्ति।
- बॉर्डर्-गावस्कर्-ट्रॉफी इत्यस्याः प्रतिस्पर्धायाः तृतीयायां क्रिकेट्-निकष-मालिकायां, भारतम् आस्ट्रेलिया-देशस्य विरुद्धं फॉलो-ऑन्-इत्येनम् वैकल्पिक-नियमं दूरीकृतवान्।

## एकं राष्ट्रम् एकं निर्वाचनमिति

एकं राष्ट्रम् एकं निर्वाचनम् इत्यनेन सम्बद्धं विधेयकद्वयम् अद्य लोकसभायां प्रस्तुतम्। केन्द्रीय-विधिमन्त्री अर्जुनराम-मेघवालः नवविंशत्यधिकैकशततमं संविधानम् चतुर्विंशत्यधिक-द्विसहस्रतमं संशोधनविधेयकम् अथ च संशोधितं केन्द्रशासित-प्रदेश-विधि-विधेयकं सदनस्य सम्मुखे स्थापितवान्। विधिमन्त्रिणा यथा विधेयकं सदनमध्ये स्थापितम् तावत् विपक्षिदलैः मतविभाजनम् अभ्यर्थितम्। नवषष्ट्यधिकद्विशतं सदस्यैः विधेयकप्रस्तुतेः पक्षे अपि च अष्टनवत्यधिकैकशतं सदस्यैः विरोधे मतं प्रकटीतम्। काङ्ग्रेस-टीएमसी-शिवसेना-उद्धवठाकरे-समूह-मार्क्सवादी-कम्यूनिस्ट-पार्टी इत्येतानि दलानि समेत्य अन्यैः विपक्षिदलैः विधेयकस्यास्य विरोधः कृतः। सहैव संविधानस्य संरचनागताधारे कठोरप्रहारः ख्यापितः। श्रीमेघवालः विपक्षिदलानाम् आरोपानां खण्डनं कृत्वा प्रतिपादितवान् यत् विधेयकमेतत् संविधानस्य आधारगत-संरचनां विरुध्य नैव स्थीयते इति। असौ विधेयकद्वयं संयुक्त-संसदीय-समितिं प्रति प्रेषयितुं प्रस्तावं प्रस्तुतवान्। काङ्ग्रेसदलस्य मनीषतिवारी उक्तवान् यत् एते विधेयके संविधानस्य मूलसंरचनां उल्लङ्घयतौ। टीएमसी-दलीयः नेता कल्याण-बनर्जी इत्येषः उक्तवान् यत् आभ्यां विधेयकाभ्यां राज्य-विधानसभानां स्वायत्तता प्रभाविता भविष्यति।

अत्रान्तरे केन्द्रीयगृहमन्त्री अमितशाहः प्रोक्तवान् यत् यदा एकं राष्ट्रम् एकं निर्वाचनमिति विधेयकं समागतं तावत् प्रधानमन्त्री नरेन्द्र मोदी सूचितवान् यत् विधेयकमिदं संयुक्त-संसदीय-समितिं प्रति प्रेषणीयमिति।

## राज्यसभा-संविधानम्

राज्यसभया अद्य भारतीयसंविधानस्य पञ्चसप्ततिवर्षाणां गौरवशालियात्रायाम् समायोजिता विशिष्टचर्चा अग्रे समारब्धा। सदनस्य नेता केन्द्रीयमन्त्री च जगत्प्रकाश-नड्डाः चर्चायां भागग्रह्णन् अवदत् यत् भारतं न केवलं बृहत्तमः प्रजातान्त्रिक-देशो विद्यते अपितु लोकतन्त्रस्य जननीत्वेनापि अस्ति इति। असौ समुदीरितवान् यत् भारतीय-लोकाचारानुसारि लोकतन्त्रे स्वतन्त्रता समानता समावेशिता च अन्तर्निहिताः वर्तन्ते। याः हि देशस्य नागरिकान् सम्मानजनकस्य जीवनस्य अधिकारं प्रददाति । एतदर्थं तस्य प्रशासनं पूर्णतया समर्पितमस्ति । अपि च देशः संविधानसभायाः समेषां सदस्यानाम् ऋणी अस्ति ये भारतीय-संविधानाय आकारं प्रदत्तवन्तः।

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।**

**प्रधानमन्त्री-जयपुर**

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य राजस्थानस्य वर्तमानसर्वकारस्य एकवर्षस्य पूर्त्यवसरे जयपुरे आयोजिते कार्यक्रमे भाग: भजित:। कार्यक्रमेऽस्मिन् असौ ऊर्जा-मार्ग-रेलमार्ग-जल-चेत्यादिभि: विषयै: सम्बद्धनां त्रिशताधिक-षट्चत्वारिंशत्-सहस्रकोटिरूप्यकाणां चतुर्विंशति-परियोजनानां उद्घाटनं, लोकार्पणं च विहितवान्। जनसभां सम्बोधयन् प्रधानमन्त्री राजस्थानस्य सर्वाङ्गीणविकासाय सर्वकारस्य प्रतिबद्धतां रेखांकितवान् तथा च राज्ये प्रगतेः त्वरिततायै "डबलइंजनइतिसर्वकारस्य" भूमिकायाः उपरि बलं प्रदत्तवान्। अस्मिन् कार्यक्रमे राजस्थानस्य मध्यप्रदेशस्य च मुख्यमन्त्रिणौ अपि भागं गृहीतवन्तौ । प्रधानमन्त्रिणा मोदिना प्रोक्तं यत् राजस्थानस्य विकासाय डबलइंजनइति सर्वकारः नैरन्तर्येण कार्यं कुर्वन् अस्ति तथा च 'एकवर्ष: - परिणामोत्कर्ष:' कार्यक्रमस्य भागत्वेन जयपुरे प्रमुखविकासपरियोजनानां उद्घाटनशिलास्थापनसमारोहे च अनेन सन्तुष्टिः प्रकटिता।

**ऋतुविज्ञान विभाग:**

भारतीयऋतुविज्ञानविभागेन पश्चिम-हिमालयीयक्षेत्रे, राजस्थान-पञ्जाब-हरियाणा-चेत्यादिषु राज्येषु च तीव्रशीततरङ्गस्थितेः पूर्वानुमानं कृतम् अस्ति। आकाशवाण्या सह विशेषवार्तालापे भारतीयऋतुविज्ञानविभागस्य वरिष्ठवैज्ञानिकः सोमासेन-रायः प्रोक्तवती यत् एतेषु क्षेत्रेषु तीव्रशीत-तरङ्गस्तिथेः गाम्भीर्यम् आगामिनं सप्त-दिवसपर्यन्तं द्रष्टुं शक्यते। केन्द्रीयप्रदूषणनियन्त्रणमण्डलस्य अनुसारं राष्ट्रियराजधान्यां वायुगुणवत्तासूचकाङ्कः चतुश्शतम् अङ्कात् अधिकः अस्ति येन कारणेन वायुगुणवत्ता गम्भीरवर्गे अस्ति। प्रदूषणस्तरस्य तीव्रवृद्धेः अनन्तरं वायुगुणवत्ताप्रबन्धन-आयोगेन दिल्ली-राष्ट्रीयराजधानी-क्षेत्रे ग्रैप इत्यस्या: योजनाया: चतुर्थचरणं कार्यान्वितम् जातम्। प्रदूषणस्य वर्धमानस्तरस्य कारणात् दिल्लीनगरस्य सर्वे प्राथमिकविद्यालया: यावत् अग्रे निर्देशाः न प्राप्यन्ते तावत् कक्षा-सञ्चालनस्य विधिद्वयम् स्थाप्यन्ते।

**शिवराजसिंहचौहान:**

प्रशासनेन कृषकाणाम् आयवर्धनाय षड्- सूत्रीय-रणनीतिः निर्मिता अस्ति। कृषिकृषककल्याणमन्त्री शिवराजसिंहचौहानः अद्य लोकसभायाम् एकस्य प्रश्नस्य प्रत्युत्तरं दत्त्वा अवदत् यत् प्रयत्नानाम् परिणामाः सम्मुखे आयान्ति इति।

**माण्डविया-द्विचक्रिकाभियानम्**

केन्द्रीय-युव-विषयकक्रीडामन्त्री मनसुखमाण्डविया इत्ययम् अद्य नवदिल्ल्यां फिटइण्डया-साइक्लिंग-ट्यूजडेज इत्येतत् द्विचक्रिकाभियानाय हरितध्वजं प्रदर्शितवान्। अत्रावधौ असौ समुचितस्वास्थ्यस्य महत्त्वं प्रबलतया प्रतिपादयन् उक्तवान् यत् केवलं एक: स्वस्थ-समाज: एव एकस्य समृद्धराष्ट्रस्य विकासं कर्तुं शक्नोतीति। श्रीमाण्डविया: न्यगादीत् यत् अस्योपक्रमस्योद्देश्यं वायुगुणवत्तासूचकाङ्के संशोधनं प्रति जागृत्या सह स्वस्थभारतस्य निर्माणमिति वर्तते।

मन्त्रिणा नागरिकै: आग्रह: कृत: यत्तै: द्विचक्रिकाक्रियाकलापानां सादृशानां शारीरिक-व्यायामा: अनुपालनीया:। अवधेयं वर्तते यत् फिटइण्डिया-साइक्लिंग ट्जडेज इति एकं महत्वपूर्णं अभियानं वर्तते। यद्धि नवदशाधिक-द्विसहस्रतमे वर्षे प्रधानमन्त्रिणा नरेन्द्रमोदिना समारब्धम्। अस्य कार्यक्रमस्य आयोजनं आदेशे एकसहस्राधिकं स्थलेषु क्रियते।

**निर्यातक: भारतदेश:**

भारतम्, विश्वे स्मार्टफोन इत्येतस्य स्मार्तदूरभाषस्य तृतीय: बृहत्तम: निर्यातक: देश: समभवत्। नवदशाधिक-द्विसहस्रतमे वर्षे भारतं त्रयोविंशतितमे स्थाने स्थितमासीत्। नवम्बर-मासैव चलदूरभाषस्य निर्यात: विंशति-सहस्रकोटि-रूप्यकाणां सीमानं स्पृष्टवान्। केन्द्रीय-सूचना-प्रौद्योगिकीयमन्त्री अश्विनी-वैष्णव: अस्य प्राप्तदत्तांशस्य प्रशंसाम् अकरोत्।

**क्रिकेट**

बॉर्डर्-गावस्कर्-ट्रॉफी इत्यस्या: प्रतिस्पर्धाया: तृतीयायां क्रिकेट्-निकष-मालिकायां, भारतम् आस्ट्रेलिया-देशस्य विरुद्धं फॉलो-ऑन्-इत्येनम् वैकल्पिक-नियमं दूरीकृतवान्। तृतीय-निकष-क्रीडायाः चतुर्थदिने, भारतं आस्ट्रेलिया-देशस्य विरुद्धं नवक्रीडकानां हानौ द्विपञ्चाशदधिकद्विशतं धावनाङ्कान् स्थापितवत् ।

**।।इति वार्ता:।।**